# वर्णोच्चारणविज्ञानम्

**डॉ.अपूर्वशर्मा**
वरिष्ठशोधाध्येता, सं.सं.प्र.
nipazu1987@gmail.com

**सारांशः**

*प्रपञ्चे या कापि भाषा भवतु, सर्वासां भाषाणां वैशिष्ट्यं वर्तते । प्रायः प्रत्येकं भाषायाः वर्णोच्चारणप्रक्रिया एकां भाषाम् अन्यभाषाभ्यः पृथक्करोति । वर्णोच्चारणम् एव शब्दम् अर्थेन सह योजयति । अतः भाषायाः शुद्धप्रयोगार्थम् ईप्सितभावाभिव्यक्त्यर्थं वर्णानां यथास्थानम् उच्चारणम् अत्यावश्यकं भवति । अतः प्रत्येकम् अपि जनः वर्णोच्चारणविज्ञानं जानीयात् । अस्मिन् लेखे भाषायाः तात्पर्यार्थः, वर्णव्यवस्था, उच्चारणस्थानानि, वर्णोद्भवः, अशुद्धोच्चारणेन जायमानाः समस्याः इत्यादयः बिन्दवः चर्चिताः सन्ति ।*

## प्रस्तावना

**वागेव विश्वा भुवनानि जज्ञे वाच इत्सर्वममृतं यच्च मर्त्यम् ।**
**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥**

***(वाक्यपदीयम्, १.१२३)***

अनुभूयते एव यत् इदं जगत् सर्वं शब्दमयम् । सर्वम् अपि ज्ञानं शब्दैः प्रकटीभवति । एषा एव *वाणी* इति । भारतीयसंस्कृत्यनुसारं विद्यायाः देवी सरस्वती अस्याः वाण्याः अधिष्ठात्री अस्ति । अमरकोषानुसारम् अस्याः सरस्वत्याः सप्त नामानि –

**ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती । *(अमरकोषः)***

ब्रह्मणः इयं *ब्राह्मी*, डुभृञ् धारणपोषणयोः इत्यस्मात् धातोः अतच्-प्रत्यये स्त्रियां ङीप्-प्रत्यये च कृते *भारती* इति शब्दः निष्पद्यते, भाष्यते शास्त्रव्यवहारादिना प्रयुज्यते इति *'भाषा'*। 'भाष व्यक्तायां वाचि' इति धातोः 'गुरोश्च हलः' (३.३.१०२) इत्यनेन 'अ'प्रत्यये, ततः 'टाप्'-प्रत्यये च कृते *'भाषा'* इति शब्दः निष्पद्यते । 'गॄ शब्दे' इति धातोः क्विप्-प्रत्यये कृते *गिर्* इति शब्दः निष्पद्यते । उच्यते असौ अनया इति, 'वच परिभाषणे' इति धातोः क्विप्-प्रत्यये कृते *वाच्* (वाक्) इति शब्दः निष्पद्यते । 'वण शब्दार्थः' इति धातोः घञ्-प्रत्यये ततः ङीन्-प्रत्यये कृते च *वाणी* इति शब्दः निष्पद्यते । 'सरो नीरं तद्वत् रसो वा अस्ति अस्याः' इति सरस्वती, 'सृ गतौ' इति धातोः निष्पन्नात् सरस् इति शब्दात् मतुप्-प्रत्यये कृते स्त्रियां *सरस्वती* इति शब्दः निष्पन्नः भवति ।

अत्र डुभृञ् धारणपोषणयोः, भाष व्यक्तायां वाचि', गॄ शब्दे, वच परिभाषणे, वण शब्दार्थः, सृ गतौ इति एतेभ्यः धातुभ्यः निष्पन्नाः *भारती, भाषा, गीः, वाग्, वाणी, सरस्वती* चेति शब्दाः अमरकोशे पर्यायवाचकत्वेन उल्लिखिताः सन्ति । एवमेव यदि विश्लेषणं क्रियते तर्हि भाषा इत्यस्य तात्पर्यं भवति – धारणं पोषणं च, व्यक्तीकरणं, शब्दीकरणं, परिभाषणं, शब्दार्थः, गतिः इति ।

अत्यन्तं सामान्यरूपेण कथ्यते *'भाष्यते इति भाषा'*। एषः *भाषा* इति शब्दः भाषणस्य वाचकः इति। अमरकोषे अस्य षड् नामानि उक्तानि –

**व्याहार उक्तिर्लपितं भाषितं वचनं वचः। *(अमरकोषः)***

*'वाक्'* अर्थात् भाषा एव सर्वासां विद्यानां विषयाणां शिल्पानां कलानां वा प्रयोजिका प्रायोजिका वा। भाषाविज्ञानदृष्ट्या भाषायाः कानिचन विशिष्टानि तत्त्वानि भवन्ति –

ध्वनयः / स्वनिम > ध्वनिविज्ञानम् (क् ख् अ आ ..........)

⬇

शब्दः > शब्दविज्ञानम् (राम, हरि, गणेश .........)

⬇

रूपम् > रूपविज्ञानम् (रामः, रामम्, रामेण ..........)

⬇

वाक्यांशः / वाक्यम् / वाक्यानि > वाक्यविज्ञानम् (रामः गच्छति, रामः वनं गच्छति)

⬇

वाक्यांशानां वाक्यानां च शाब्दिकार्थः > अर्थविज्ञानम् (रामः इति जनः अरण्यं प्रति गमनकार्यं करोति)

**मन्यते एव यत् भाषा स्मृतिकोशेन इव कार्यं करोति। अस्मिन् कोशे सहवक्तृभिः प्राप्तैः सङ्केतैः सहैव स्वनिर्मितानि सङ्केतानि अपि सम्मिलितानि भवन्ति। एतानि सङ्केतानि माध्यमानि अपि सन्ति येषां द्वारा ज्ञानस्य निर्माणं भवति। एतैः सह मनुष्यस्य विचाराणाम् अस्मितायाः च दृढः सम्बन्धः वर्तते। एषः सम्बन्धः तावान् दृढः भवति यत् बालानां मातृभाषायाः विरोधस्य अथवा अपाकरणस्य प्रयासाः तेषां व्यक्तित्वे हस्तक्षेपाः इव भासन्ते।**

(शिक्षकसन्दर्शिका, प्रथमः भागः)

## वर्णोद्भवः

भाषा मुखात् उच्चारितानां पदानां वाक्यानां च समूहः। मनसि उद्भूताः विचाराः भावाः वा अनया एव अभिव्यक्ताः भवन्ति। भागवत्पुराणे उक्तम् अपि –

**स एष जीवो विवरप्रसूतिः, प्राणेन घोषेण गुहां प्रविष्टः।**
**मनोमयं सूक्ष्ममुपेत्य रूपं, मात्रा स्वरो वर्ण इति स्थविष्टः॥**

***(श्रीमद्भागवतम् ११.१२.१७)***

अर्थात् सः परमात्मा एव अनाहतनादस्वरूपेण परावाणीनामकेन प्राणेन सह मूलाधारचक्रं प्रविशति, ततः मणिपूरकचक्रम् (नाभिस्थानम्) आगत्य पश्यन्तीवाण्याः मनोमयसूक्ष्मरूपं धरति । ततः कण्ठदेशे स्थितं विशुद्धनामकं चक्रम् आगत्य तत्र मध्यमावाणीरूपेण व्यक्तीभवति । ततः क्रमशः मुखम् आगत्य ह्रस्वदीर्घादिमात्रात्मक्याः उदात्तानुदात्तादिस्वरात्मक्याः ककारादिवर्णरूपायाः स्थूलवैखरीवाण्याः प्रकटीभवति ।

वर्णोद्भवविषये एवमपि प्राप्यते –

**आकाशवायुप्रभवः शरीरात्समुच्चरन् वक्त्रमुपैति नादः ।**
**स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः ॥** (वर्णोच्चारणशिक्षा - १)

अर्थात् आकाशवायुसंयोगेन समुत्पन्नः यः नाभेः अधोभागात् समुच्चरन् मुखं प्राप्नोति सः नादः । सः कण्ठादीनि स्थानानि सम्प्राप्य वर्णभावं प्राप्नोति सः एव क्रमेण शब्दत्वम् अवाप्नोति ।

भाषायाः विभिन्नानि तत्त्वानि क्रमबद्धानि भवन्ति । एतेषां सर्वेषाम् अपि क्रमेण उपयोगेन एव भाषात्वं सिद्ध्यति । क्रमस्य महत्त्वं प्रतिपादयता भर्तृहरिणा अपि उक्तम् –

**क्रमो हि धर्मः कालस्य तेन वाक्यं न विद्यते ।** *(वाक्यपदीयम्, वाक्यकाण्डम्, ५०)*
**वर्णानां च पदानाञ्च क्रममात्रनिवेशिनी ।**
**पदाख्या वाक्यसंज्ञा च शब्दत्वं नेष्यते तयोः ॥** *(वाक्यपदीयम्, वाक्यकाण्डम्, ५१)*

भाषायाः मूलस्वरूपं मौखिकम् एव । अस्मिन् सन्दर्भे उच्चारणस्थानानि महत्त्वभूतानि भवन्ति । उच्चारणस्थानानि एव मौखिकभाषां प्रभावयन्ति । यथा,

'घटः' इत्यस्य उच्चारणं यदि 'गतः' इति क्रियते तर्हि अर्थस्य परिवर्तनं भवति ।
'घटः' अर्थात् लघुकलशविशेषः किन्तु 'गतः' अर्थात् गतवान् इति ।

एवमेव पदानाम् उच्चारणदोषात् जायमानम् अर्थभेदं पश्यामः –

'आ' इत्यस्य 'अ' उच्चारणम् → आगच्छत् (अर्थात् आगतवान्/आगतवती)
→ अगच्छत् (अर्थात् गतवान्/गतवती)
→ पात्रम् (भाण्डं भाजनं वा)
→ पत्रम् (पर्णम्/वार्तापत्रम्/सन्देशपत्रम् इति अर्थः)
'ई' इत्यस्य 'इ' उच्चारणम् → भवती (स्त्रीलिङ्गे त्वम् इत्यस्य सम्मानार्थे)
भवति (क्रियापदम् अस्ति इति अर्थे)
'ऊ' इत्यस्य 'उ' उच्चारणम् → कूपीतः (कूपी इत्यस्मात्)
→ कुपितः (क्रुद्धः इति अर्थः)

केषाञ्चन पदानाम् उच्चारणे दोषकारणात् तेषां पदानां कोऽपि अर्थः एव न आगच्छति । यस्मात् अन्यस्य पुरतः भावस्य उपस्थापने क्लेशः अनुभूयते । तादृशानि पदानि कानिचन यथा –

'कूपी' इत्यस्य उच्चारणं 'कुपि' इति ।
'भवती' इत्यस्य उच्चारणं 'बवति' इति ।
'खादामि' इत्यस्य उच्चारणं 'कादामि' इति ।
'लेखः' इत्यस्य उच्चारणं 'लेकः' इति ।

- केचन मम इत्यस्य उच्चारणं मम् इति कुर्वन्ति ।

- एतादृशस्य दोषस्य कारणं तु मम इति पदे कति वर्णाः सन्ति इत्यस्य ज्ञानस्य अभावः ।
- यदि ते इदं जानीयुः यत् मम = म् + अ + म् +अ इति तर्हि मम् इति असम्यक् इति अवगच्छेयुः इति ।
- केचन तु ज्ञात्वा अपि तादृशम् उच्चारयन्ति, एवं प्रमादकारणात् अपि भवति ।

अतः एतादृशानां दोषाणां निवारणाय शुद्धम् अभीष्टं च अर्थं प्राप्तुं वर्णानां ज्ञानम् अपेक्षितं भवति । या कापि भाषा भवतु नाम उच्चारणस्थानानां कारणतः वर्णानाम् अनेके प्रकाराः भवन्ति । उच्चारणस्थानं वर्णान् पृथक्करोति ।

## उच्चारणस्थानानि

प्रत्येकं वर्णस्य किम् उच्चारणस्थानम् इति ज्ञानम् आवश्यकं भवति । वर्णानाम् उच्चारणस्थानानां ज्ञानं विना उच्चारणाभ्यासः समीचीनतया कर्तुं न शक्यते । पाणिनीयशिक्षायाम् *अष्टौ उच्चारणस्थानानि* उक्तानि सन्ति –

**अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।**
**जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ।।** *(पाणिनीयशिक्षा १३)*

पाणिनीयशिक्षायां वर्णानाम् उच्चारणस्य अष्टौ स्थानानि उक्तानि ।

तानि यथा – उरः/हृदयम्, कण्ठः, शिरः, जिह्वामूलं, दन्ताः, नासिका, ओष्ठौ तालु च इति ।

वर्णानाम् उच्चारणं कथं करणीयम् इत्यस्मिन् विषये पाणिनीयशिक्षायाम् एवम् अस्ति –

**व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पीडयेत् ।**
**भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ।।** *(पाणिनीयशिक्षा २५)*

वर्णानाम् उच्चारणविषये पाणिनीयशिक्षायाम् उक्तं - यथा पतनभेदाभ्यां भीता व्याघ्री तीक्ष्णदन्ताभ्यां पुत्रान् गृहीत्वा पीडां विना इतस्ततः नयति तथैव वर्णानाम् उच्चारणं करणीयं भवति ।

वर्णानाम् उच्चारणसमये कीदृशम् अवधानं प्रदातव्यम् इत्यस्मिन् सन्दर्भे पुनः लिखति –

**एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः ।**
**सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ।।** *(पाणिनीयशिक्षा ३१)*

वर्णानाम् उच्चारणकाले अत्यन्तम् अवधानं दातव्यं भवति । वर्णानां सम्यक्तया प्रयोगेण श्रेष्ठत्वं प्राप्यते ।

अतः अस्मिन् श्लोके वर्णाः एवं प्रकारेण प्रयोक्तव्याः न अव्यक्ताः भवेयुः, न च पीडिताः भवेयुः इति वर्णितम् ।

अव्यक्तस्य उदाहरणं यथा –

**सः फलं खादति** इत्यस्य वाक्यस्य कथने सः फलं खादत.... (इकारस्य अस्पष्टोच्चारणम्) ।

**सः गृहे अस्ति** इत्यस्य वाक्यस्य कथने सः गृहे अस्....... (ति इत्यस्य अस्पष्टोच्चारणम्) ।

पीडितस्य उदाहरणं यथा –

सः इत्यस्य स्थाने सेः इति । (अ – ए)

मम इत्यस्य स्थाने मम् इति । (अ इत्यस्य लोपः)

पठामि इत्यस्य पटामि इति । (ठ – ट)

सम्यक् इत्यस्य सोम्यक् इति । (अ – ओ)

वाक्यम् इत्यस्य बाक्यम् इति । (व – ब)

कक्षा इत्यस्य कच्छा इति। (क्ष – छ)

या इत्यस्य जा इति। (य – ज)

वर्णानाम् उच्चारणदोषात् का हानिः जायते ? इति विषये पाणिनीयशिक्षायाम् उल्लिखितम् अस्ति –

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह।**

**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥** *(पाणिनीयशिक्षा ५२)*

स्वरतः वर्णतः वा अशुद्धोच्चारितः मन्त्रः शब्दः वा तम् अर्थं न द्योतयति यदर्थं सः मन्त्रः शब्दः वा उच्चार्यते। सः अशुद्धोच्चारितः मन्त्रः शब्दः वा वाग्वज्रवत् यजमानमेव नाशयति। यथा स्वरस्य अपराधात् इन्द्रशत्रोः वृत्रासुरस्य नाशः अभवत्। कथं तत् -

*त्वष्टा ऋषिः स्वस्य पुत्रस्य वृत्रासुरस्य बलवृद्ध्यर्थं यज्ञम् अकरोत्। यत्र 'इन्द्रशत्रुर्वर्धस्व' (इन्द्रशत्रोः वृद्धिः भवेत्) इत्यस्य मन्त्रस्य उच्चारणम् 'इन्द्रः शत्रुर्वर्धस्व' इत्येवम् अकरोत्। येन इन्द्रः वृत्रासुरस्य शत्रुः इति अर्थः प्रस्फुटितः। यस्मात् इन्द्रेण वृत्रासुरः हतः।*

न केवलम् एतावदेव वर्णोच्चारणदोषात् भाषायां विकृतरूपम् अपि समागच्छति –

**भवान् घटम् आनयतु** इति वाक्यस्य आशयः अस्ति – **कश्चन लघुजलपात्रविशेषम् आनयेत्** इति।

किन्तु वक्ता एतत् वाक्यम् एवं वदति – **भवान् कटम् आनयतु**।

अत्र एकस्य वर्णस्य उच्चारणदोषात् श्रोता उपवेशनार्थं **कटम्** आनयति।

अर्थात् एकस्य वर्णस्य उच्चारणदोषात् सम्पूर्णस्य अर्थस्य एव परिवर्तनं जातम्।


एवमेव कश्चन 'पठामि' इत्यस्य उच्चारणं 'पटामि' इति करोति।


तदेव 'पटामि' इति श्रुत्वा कश्चन 'पतामि' इति वदति चेत् सम्पूर्णस्य अर्थस्य परिवर्तनमेव भवति।

एतादृशाः दोषाः उच्चारणकाले न भवेयुः इत्येतदर्थं सर्वदा वर्णोच्चारणस्थानज्ञानम् आवश्यकम्।

वर्णानाम् उच्चारणस्थानानि अस्यां मञ्जूषायां द्रष्टुं शक्नुमः –

| | | | |
|---|---|---|---|
| अकुहविसर्जनीयानां कण्ठः – | | अ आ क् ख् ग् घ् ङ् ह् : | (कण्ठः) |
| इचुयशानां तालु | – | इ ई च् छ् ज् झ् ञ् य् श् | (तालु) |
| ऋटुरषाणां मूर्धा | – | ऋ ॠ ट् ठ् ड् ढ् ण् र् ष् | (मूर्धा) |
| लृतुलसानां दन्ताः | – | लृ त् थ् द् ध् न् ल् स् | (दन्ताः) |
| उपूपध्मानीयानामोष्ठौ | – | उ ऊ प् फ् ब् भ् म् उपध्मानीयः | (ओष्ठौ) |
| ञमङणनानां नासिका च | – | ञ् म् ङ् ण् न् | (नासिका) |
| एदैतोः कण्ठतालु | – | ए ऐ | (कण्ठः तालु च) |



उपध्मानीयः

जिह्वामूलीयस्य जिह्वामूलम्,

नासिका अनुस्वारस्य

भाषा श्रवणाधीना भवति । यथा शृणोति तथैव उच्चरति । अतः वक्तुः एतत् उत्तरदायित्वं भवति सः स्पष्टं शुद्धं च उच्चरेत् । उच्चारणे शुद्धता अभ्यासेन पुनः पुनः श्रवणेन भाषणेन समागच्छति, अतः पुनः पुनः वर्णानां शब्दानां, पदानां वाक्यानां च उच्चारणं करणीयं भवति । उच्चारणशुद्धतार्थं शिक्षकैः विशेषावधानं प्रदातव्यम्, यतः शिक्षकान् श्रुत्वा एव छात्राः भाषणस्य प्रारम्भं कुर्वन्ति । सर्वदा स्मरणीयम् –

शिक्षकः यदि सेः इति वदति, छात्राः अपि सेः इति एव वदिष्यन्ति ।
शिक्षकः यदि मम् इति वदति, छात्राः अपि मम् इति एव वदिष्यन्ति ।
शिक्षकः यदि पटामि इति वदति, छात्राः अपि पटामि इति एव वदिष्यन्ति ।
शिक्षकः यदि सम्योक् इति वदति, छात्राः अपि सम्योक् इति एव वदिष्यन्ति ।

सर्वदा अवधातव्यं यत् वर्णोच्चारणप्रक्रियायाम् अशुद्धेः कारणत्रयमेव अस्ति –

**अशुद्धश्रवणम्, वर्णोच्चारणस्थानानां ज्ञानाभावःअनभ्यासः च**

## सन्दर्भ-ग्रन्थाः :


1. शर्मा बालकृष्ण(सम्पा.), **पाणिनीयशिक्षा**, श्रीनिवासरथः कालिदास अकादमी, उज्जैन, १९९३
2. शर्मा पण्डितरघुनाथः (टीकाकारः), **वाक्यपदीयम्,** सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९८८
3. स्वामी दयानन्दसरस्वती, **वर्णोच्चारणशिक्षा,** अजमेरवैदिकमन्त्रालयः, १९८२
4. **श्रीमद्भागवतम्,** महर्षिः व्यासः, गीताप्रेस गोरखपुरम्, २०१५
5. आचार्य नारायणरामः (सम्पादकः) **अमरकोषः**, चौखम्भा पब्लिकेशर्स, २०१३
6. **शिक्षकसन्दर्शिका**, प्रथमभागः, संस्कृतसंवर्धनप्रतिष्ठानम्, देहली, २०२०